✧˖°*❋ ❋*°˖✧

# सुब्रह्मण्य अष्टकं स्तोत्रम् (करावलंब)

# Subrahmanya Ashtakam Stotram (Karavalamba)

✧˖°*❋ ❋*°˖✧

# सुब्रह्मण्य अष्टकं स्तोत्रम्

हे स्वामिनाथ करुणाकर दीनबंधो,
श्रीपार्वतीशमुखपंकज पद्मबंधो ।
श्रीशादिदेवगणपूजितपादपद्म,
वल्लीसनाथ मम देहि करावलंबम् ॥ 1 ॥

देवादिदेवनुत देवगणाधिनाथ,
देवेंद्रवंद्य मृदुपंकजमंजुपाद ।
देवर्षिनारदमुनींद्रसुगीतकीर्ते,
वल्लीसनाथ मम देहि करावलंबम् ॥ 2 ॥

नित्यान्नदान निरताखिल रोगहारिन्,
तस्मात्प्रदान परिपूरितभक्तकाम ।
शृत्यागमप्रणववाच्यनिजस्वरूप,
वल्लीसनाथ मम देहि करावलंबम् ॥ 3 ॥

क्रौंचासुरेंद्र परिखंडन शक्तिशूल,
पाशादिशस्त्रपरिमंडितदिव्यपाणे ।
श्रीकुंडलीश धृततुंड शिखींद्रवाह,
वल्लीसनाथ मम देहि करावलंबम् ॥ 4 ॥

देवादिदेव रथमंडल मध्य वेद्य,
देवेंद्र पीठनगरं दृढचापहस्तम् ।
शूरं निहत्य सुरकोटिभिरीड्यमान,
वल्लीसनाथ मम देहि करावलंबम् ॥ 5 ॥

हारादिरत्नमणियुक्तकिरीटहार,
केयूरकुंडललसत्कवचाभिराम ।
हे वीर तारक जयाऽमरबृंदवंद्य,
वल्लीसनाथ मम देहि करावलंबम् ॥ 6 ॥

पंचाक्षरादिमनुमंत्रित गांगतोयैः,
पंचामृतैः प्रमुदितेंद्रमुखैर्मुनींद्रैः ।
पट्टाभिषिक्त हरियुक्त परासनाथ,
वल्लीसनाथ मम देहि करावलंबम् ॥ 7 ॥

श्रीकार्तिकेय करुणामृतपूर्णदृष्ट्या,
कामादिरोगकलुषीकृतदुष्टचित्तम् ।
भक्त्वा तु मामवकलाधर कांतिकांत्या,
वल्लीसनाथ मम देहि करावलंबम् ॥ 8 ॥

सुब्रह्मण्य करावलंबं पुण्यं ये पठंति द्विजोत्तमाः ।
ते सर्वे मुक्ति मायांति सुब्रह्मण्य प्रसादतः ।
सुब्रह्मण्य करावलंबमिदं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं तत्क्षणादेव नश्यति ॥

✧×·····°*❋ ❋*°·····×✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net